# संस्कृतवार्ता:

**दिनाङ्क : 20/07/2025**

**सायम्- 06:20**

**<u>आदौ-मुख्यवार्ता:</u>**

- श्वः आरभ्यमाणस्य संसदस्य मानसूनसत्रस्य पूर्वं नवदिल्लीनगरे सर्वदलीयसंगोष्ठी अभवत्; संसदीयकार्याणां मन्त्री किरेन् रिजिजुः अवदत् यत्, संसदीयकार्याणां सुचारुरूपेण संचालनाय सर्वकारस्य विपक्षस्य च समन्वयनस्य आवश्यकता वर्तते।
- प्रधानमन्त्री नरेन्द्रमोदी बुधवासरात् यू.के-मालदीव्-देशयोः चतुर्दिवसीययात्रायाः आरम्भं करिष्यति।
- वियतनामदेशे हा-लाङ्ग-बे इत्यत्र पर्यटकनौकायाः प्रत्यावर्त्य जलमग्नानन्तरं मृतानां संख्या अष्टत्रिंशत् अभवत्।
- भारतस्य मुरली श्रीशंकरः पुर्तगाल एथलेटिक्स-क्रीडायां दीर्घकूर्दनस्य उपाधिं प्राप्तवान्।

**अपि च,**

- बुडापेस्ट्-नगरे चतुर्थ-क्रमाङ्कन-मल्लयुद्ध-श्रृङ्खलायां भारतेन स्वर्ण-त्रयसहितं अष्टपदकानि प्राप्तानि ।

-------------

**मानसूनसत्रम** 

संसदस्य मानसूनसत्रे द्वयोः सदनयोः सुचारुरूपेण कार्यं सुनिश्चेतुं, सत्रात् पूर्वम्, अद्य सर्वकारेण सर्वपक्षीयसंगोष्ठी कृता। सत्रस्य सुचारुरूपेण संचालनार्थं विपक्षदलेभ्यः सहकार्यं प्राप्तुं सर्वकारेण एषा सभा आहूता आसीत्। लोकसभा-राज्यसभायाः प्रतिनिधित्वं कुर्वन्तः विभिन्नराजनैतिकदलानां दलनेतारः सभायां उपस्थिताः आसन्। केन्द्रीयमन्त्री तथा राज्यसभायां सदनस्य नेता जगत प्रकाश नड्डा इत्यस्य अध्यक्षतायां संसदीयकार्यमन्त्री किरेन रिजिजुः, संसदीयकार्याणां राज्यमन्त्रिणः अर्जुनराममेघवालः, डॉ. एल.मुरुगनः च उपस्थिताः आसन्। तदतिरिक्तं काङ्ग्रेस-दलात् गौरवगोगोई, प्रमोद तिवारी च, एन्.सि.पी.-एस.सी.पी-तः सुप्रिया सुले, डी.एम.के-तः तिरुचि शिवा, समाजवादी पार्टीतः रामगोपाल यादवः, डीएमकेतः टी आर बालू, आप-इतिदलात् संजयसिंहः च सभायां भागं गृहीतवन्तः। सभायाः अनन्तरं वार्ताहरैः सह भाषणं कुर्वन् संसदीयकार्याणां मन्त्री किरेन् रिजिजुः अवदत् यत्, संसदीयकार्याणां सुचारुरूपेण संचालनाय सर्वकारस्य विपक्षस्य च समन्वयनस्य आवश्यकता वर्तते।

श्वः आरभ्य मानसूनसत्रं अगस्तमासस्य एकविंशति-दिनाङ्कपर्यन्तं भविष्यति। अधिवेशनकाले द्वयोः सदनयोः आहत्य एकविंशतिः अधिवेशनानि भविष्यन्ति। सत्रस्य अवसरे जन-विश्वास-विधेयकः-विंशति-पञ्चविंशतिः, राष्ट्रियक्रीडाशासनविधेयक: विंशति-पञ्चविंशतिः, व्यापारिक-नौकायान-विधेयकं: विंशति-पञ्चविंशतिः, इत्यादिभिः सह महत्त्वपूर्णविधेयकाः चर्चायै पारितार्थं च उपस्थापयितुं शक्यन्ते।

## प्रधानमन्त्री नरेन्द्रमोदी

प्रधानमन्त्री नरेन्द्रमोदी बुधवासरात् (यूके) इति ब्रिटेन देशस्य मालदीवस्य च द्वयोः राष्ट्रयोः यात्रां करिष्यति। यात्रायाः प्रथमे चरणे प्रधानमन्त्री जुलाईमासस्य त्रयोविंशति दिनाङ्कात् चतुर्विंशति दिनाङ्कपर्यन्तं ब्रिटेन-देशस्य समकक्षस्य कीर् स्टारमर इत्यस्य आमन्त्रणे ब्रिटेन-देशं गमिष्यति। अस्मिन् भ्रमणावधौ प्रधानमन्त्री मोदी भारत-ब्रिटेन-द्विपक्षीयसम्बन्धानां सम्पूर्णपरिधिविषये प्रधानमन्त्रिणा स्टारमर इत्यनेन सह विस्तृतविमर्शं करिष्यति। क्षेत्रीयवैश्विकमहत्त्वयोः विषयेषु अपि विचारविनिमयं करिष्यति। श्रीमोदी महामहिम-राज्ञा चार्ल्स-तृतीयेन सहापि मिलिष्यति इति अपेक्षास्ति। निज-यात्रायाः द्वितीये चरणे प्रधानमन्त्री मोदी अस्य मासस्य पञ्चविंशति दिनाङ्कात् मालदीवस्य राष्ट्रपतिः डॉ. मोहम्मद मुइज्जु इत्यस्य आमन्त्रणे द्विदिवसात्मके मालदीव-यात्रायां भविष्यति। सः मालदीवस्य स्वातन्त्र्यस्य षष्ठीवर्षस्योत्सवे' मुख्यातिथिः' भविष्यति। यात्रावधौ सः मालदीवस्य राष्ट्रपतिना सह मिलित्वा परस्पर-हितानां विषयेषु चर्चां करिष्यति।

## वियतनामदेशे

वियतनामदेशे हा-लाङ्ग-बे इत्यत्र पर्यटकनौकायाः प्रत्यावर्त्य जलमग्नानन्तरं मृतानां संख्या अष्टत्रिंशत् अभवत्, यतः अद्यापि अदृश्यानां अन्वेषण-उद्धार-कार्यक्रमाः निरन्तरं प्रचलन्ति । ह्यः एषा घटना तदा अभवत् यदा नौका क्षेत्र-व्यापी-प्रबल-चक्रवातेन ग्रस्ता अभवत्, येन निमग्नात् पूर्वं अधिकारिभिः सह सम्पर्कः नष्टः अभवत्। क्रूज-नौकायां त्रिपंचाशत् जनाः गच्छन्ति स्म, येषु पञ्च

चालकदलस्य सदस्याः अष्टचत्वारिंशत् यात्रिणः च आसन्, येषु बहवः युवानः बालकाः च आसन् इति सूच्यते। प्रतिकूलवायुस्थितेः, प्रचण्डवृष्टेः च मध्येऽपि उद्धारदलानि दश-जनान् जलात् उद्धारयितुं समर्थानि अभवन् ।

**<u>विराम:</u>**

**संस्कृतवार्तायाः संस्करणमिदम□ इदानीम□ आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः <u>www.newsonair.gov</u>.in वेबसाइट इत्यत्र, अथ newsonair मोबाइल ऐप इत्यत्र अपि उपलब्धो भविष्यति।**

**<u>मनसुखमाण्डविया</u>**

अद्य वाराणसीनगरस्य बनारस-हिन्दू-विश्वविद्यालये केन्द्रीय-युव-प्रकरणानां क्रीडामन्त्री मनसुखमाण्डविया इत्यनेन 'फिट् इण्डिया सण्डेस् ऑन् ‘साईकिल' इत्यस्य अभियानस्य नेतृत्वं कृतम्। केन्द्रीयमन्त्री उक्तवान् यत्, अस्य अभियानस्य माध्यमेन सर्वासु शैक्षणिकसंस्थासु नशा मुक्ति-सन्देशं, षट्सहस्रतोऽपि अधिकेषु स्थानेषु प्रसारितम् अस्ति।

**<u>विश्व-चन्द्रमा-दिवसः</u>**

अद्य ऐतिहासिकस्य अपोलो इलेवेन् मिशन इत्यस्य अभियानस्य स्मरणार्थं अन्ताराष्ट्रियचन्द्रमादिवसः आचर्यते, यद्दिने मनुष्येण प्रथमवारं एकोनसप्तत्युत्तर-नवदश-शततमे वर्षे जुलाईमासस्य विंशति दिनाङ्के चन्द्रमसि पादार्पणं कृतम्। संयुक्तराष्ट्रसङ्घस्य महासभायाः अनुशंसायाः अनन्तरं आधिकारिकरूपेण एकविंशत्युत्तर-द्विसहस्रतमे वर्षे

अस्य दिवसस्य आचरणम् आरब्धम्। अस्मिन् दिने चन्द्र-अन्वेषणस्य वैश्विक-उपार्जनानां उत्सवः क्रियते। अथ अयं दिवसः अन्ताराष्ट्रिय-सहकार्यं, स्थायि-अन्तरिक्ष-अभ्यासं, चन्द्र-संसाधनानाम् शान्तिपूर्ण-उपयोगं च प्रवर्धयति। ऐषमः वर्षस्य विषयः 'एकः चन्द्रः, एका दृष्टिः, एकं भविष्यम्' इति।

## **मलेरिया टीका**

भारतं एड्-फेल्काइ-वॉक्स् (AdFalciVax) इति नामकं बहुचरणीयं मलेरियाटीकां विकासयति। अस्य टीकायाः उद्देश्यं मानवसंक्रमणात् रक्षणं प्रदातुं तथा च परजीविनः सञ्चार-जनित-सामुदायिक-संक्रमणस्य न्यूनीकरणं वर्तते। एड्-फेल्काइ-वॉक्स् इति प्रथमा स्वदेशीया पुनर्संयोजिता काइमेरिक मलेरिया टीका अस्ति यत् विशेषतया मलेरियायाः अत्यन्तं घातकरूपेण उत्तरदायी परजीवी प्लास्मोडियम, फाल्सिपेरम इत्यनयोः द्वयोः महत्त्वपूर्णयोः चरणयोः लक्ष्यं कर्तुं विनिर्मितम् अस्ति। भारतीयचिकित्सासंशोधनपरिषद् सम्प्रति जैवप्रौद्योगिकी-विभागेन-राष्ट्रीयप्रतिरक्षाविज्ञानसंस्थायाः सहयोगरूपेण एतस्य मलेरियाटीकायाः विकासं करोति।

## **एथलेटिक्स-क्रीडा**

एथलेटिक्स-क्रीडायां मुरलीश्रीशङ्करः गतरात्रौ सप्त दशमलव सप्त-पंच मीटर्-पर्यन्तं कूर्दनं कृत्वा पुर्तगाल-क्रीडा-समारोहे -दीर्घ-कूर्द-उपाधिं प्राप्तवान्। अवधेयमस्ति यत्, एतत् आयोजनम्, विश्व-एथलेटिक्स-महाद्वीपीय-भ्रमण-कांस्यस्तरीय-मेलनस्य भागः अस्ति।

**मल्लयुद्धम** 

बुडापेस्ट्-नगरे चतुर्थ-क्रमाङ्कन-मल्लयुद्ध-श्रृङ्खलायां भारतेन स्वर्ण-त्रय-सहितं अष्टपदकानि प्राप्तानि।

**।।इति वार्ता।।**